श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २९

*देवानाममृतोपलब्धिप्रकारवर्णनम्*

उद्गच्छतस्तव करादमृतं हरत्सु
    दैत्येषु तानशरणाननुनीय देवान्।
सद्यस्तिरोदधिथ देव भवत्प्रभावा-
    दुद्यत्स्वयूथ्यकलहा दितिजा बभूवुः॥ १॥

श्यामां रुचाऽपि वयसाऽपि तनुं तदानीं
    प्राप्तोऽसि तुङ्गकुचमण्डलभङ्गुरां त्वम्।
पीयूषकुम्भकलहं परिमुच्य सर्वे
    तृष्णाकुलाः प्रतिययुस्त्वदुरोजकुम्भे॥ २॥

का त्वं मृगाक्षि विभजस्व सुधामिमामि-
    त्यारूढरागविवशानभियाचतोऽमून्।
विश्वस्यते मयि कथं कुलटाऽस्मि दैत्या
    इत्यालपन्नपि सुविश्वसितानतानीः॥ ३॥

मोदात् सुधाकलशमेषु ददत्सु सा त्वं
    दुश्चेष्टितं मम सहध्वमिति ब्रुवाणा।
पङ्क्तिप्रभेदविनिवेशितदेवदैत्या
    लीलाविलासगतिभिः समदाः सुधां ताम्॥ ४॥

अस्मास्वियं प्रणयिनीत्यसुरेषु तेषु
    जोषं स्थितेष्वथ समाप्य सुधां सुरेषु।
त्वं भक्तलोकवशगो निजरूपमेत्य
    स्वर्भानुमर्धपरिपीतसुधं व्यलावीः॥ ५॥

www.prapatti.com

त्वत्तः सुधाहरणयोग्यफलं परेषु
दत्वा गते त्वयि सुरैः खलु ते व्यगृह्णन्।
घोरेऽथ मूर्छति रणे बलिदैत्यमाया-
व्यामोहिते सुरगणे त्वमिहाविरासीः॥ ६ ॥

त्वं कालनेमिमथ मालिमुखाञ्जघन्थ
शक्रो जघान बलिजम्भवलान् सपाकान्।
शुष्कार्द्रदुष्करवधे नमुचौ च लूने
फेनेन नारदगिरा न्यरुणो रणं त्वम्॥ ७ ॥

योषावपुर्दनुजमोहनमाहितं ते
श्रुत्वा विलोकनकुतूहलवान् महेशः।
भूतैस्समं गिरिजया च गतः पदं ते
स्तुत्वाऽब्रवीदभिमतं त्वमथो तिरोधाः॥ ८ ॥

आरामसीमनि च कन्दुकघातलीला-
लोलायमाननयनां कमनीं मनोज्ञाम्।
त्वामेष वीक्ष्य विगलद्वसनां मनोभू-
वेगादनङ्गरिपुरङ्ग समालिलिङ्ग॥ ९ ॥

भूयोऽपि विद्रुतवतीमुपधाव्य देवो
वीर्यप्रमोक्षविकसत्परमार्थबोधः।
त्वन्मानितस्तव महत्त्वमुवाच देव्यै
तत्तादृशस्त्वमव वातनिकेतनाथ॥ १० ॥

**********